शिवकवचस्तोत्रं

नं० १३१७

नं० १२२५

#5777

#(5777)

F — 8

Complete

Dharma

शि· ॐ श्रीगुरवे नमः ॐ नमः शिवाय ॐ नमस्कृत्य म
क· हेशानं विश्वव्यापिनमीश्वरं वक्ष्ये शिवमयं वर्म
१ सर्वरक्षाकरं नृणां शुचौ देशे समासीनो यथाव
त्कल्पितासनः जितेन्द्रियो जितप्राणः चिंतयेच्छि
वमव्ययं हृत्पुंडरीकांतरसन्निविष्टं स्वतेजसा
व्याप्तनभोवकाशं अतींद्रियं सूक्ष्ममनंतमाद्यं
ध्यायेत्परानंदमयं महेशं ध्यानावधूताखिलक

र्मबंधमुक्तिरं चिदानंदनिमग्नचेताः षडक्षरन्यास
समाहितात्मा षोढेन कुर्यात्कवचेन रक्षां मां पा
तु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे
यन्नाम दिव्यं वरमंत्रमूलं धुनोतु मे सर्वमघं हृदि
स्थं सर्वत्रगं मां रक्षतु विश्वमूर्तिर्ज्योतिर्मयानंदम
याश्चिदात्मा अणोरणीयानुरुशक्तिरेकः सर्वेश्वरः
पातु भयादशेषात् यो मूर्त्तरूपेण बिभर्ति विश्वपा

शि॰ क॰ २

2

यात्सभूमौगिरिशोष्टमूर्तिः योपांस्वरूपेणजगतांकरोति
संजीवनंसोवतुमेजलेभ्यः कल्पावसानेभुवनानिदग्ध्वा
सर्वाणियोनृत्यतिभूरिलीलः सकालरुद्रोवतुमांद
वाग्नेर्वात्यादिभीतेरखिलाच्चपापात् प्रदीप्तविद्युत्क
नकावभासः सदावराभीतिकुठारहस्तः चतुर्मुखस्व
स्तत्पुरुषस्त्रिनेत्रः प्राच्यांस्थितोरक्षतुमामजस्रं कु
ठारवेदांकुशपाशशूलढक्काक्षमालाहिगणान्दधा

नः चतुर्मुखोनीलरुचिस्त्रिनेत्रः पायादघोरो दिशि
दक्षिणस्यां कुंदेंदुशंखस्फटिकावदातो वेदाक्षमा
लावलयाभयांकः दिप्राश्चतुर्वक्त्रउरुप्रभावः स
द्योध्यजातोवतुमांप्रतीच्यां वराक्षमालाभयटंक
हस्तः सरोजकिंजल्कसमानवर्णः त्रिलोचनश्चा
रुचतुर्मुखोमांपायादुदीच्यांदिशिवामदेवः वरा
भयेष्वंकुशपाशशार्ङ्गकपालटंकाक्षत्रिशूलपा

शि॰ क॰ ३

3

णिः शितिद्युतिः पंचमुखोवतान्मामीशानऊर्ध्वंपरमप्र
काशः मूर्धानमव्यान्ममचंद्रमौलिर्भालंममाव्यादथभा
लनेत्रः नेत्रेममाव्याद्भगनेत्रहारीनासांसदारक्षतुवि
श्वनाथः पायाच्छ्रुतीमेश्रुतिगीतकीर्तिःकपोलमव्या
त्सततंकपालीवक्त्रंसदारक्षतुपंचवक्त्रोजिह्वांसदा
रक्षतुवेदजिह्वः कंठंगिरीशोवतुनीलकंठःपाणि
द्वयंपातुपिनाकपाणिः दोर्मूलमव्यान्ममधर्मवाहु

र्वक्त्रः स्थलं दक्षमध्वांतको व्यात्ममोदरं पातुगिरींद्र
पत्नीवामपार्श्वं ममाव्यात्मदनांतकारी हेरंबमनाताे म
मपातुनाभिं पायात्कटिं धूर्जटिरीश्वरो सौ ऊरुद्व
यं पातुकुवेरमित्रो जानुद्वयो व्याज्जगदीश्वरो मे मां
मध्ययामे वक्त्रवामदेवः त्रियंवकः पातुतृतीय
यामे वृषध्वजः पातुदिनांतयामे पायान्निशादौ
शशिशेखरो मां गंगाधरो रक्षतु मां निशीथे गौरी

शि॰
क॰
५

पतिः पातु निशावसाने म्रत्युंजयो रक्षतु मां प्रभाते ग
हस्थितं रक्षतु पूंकरो मां स्थाणुः सदा पातु वहिःस्थि
तं मां नदंनरे पातु पतिः पशूनां सदा शिवो रक्षतु मा
मनंतात् तिष्ठंतमव्याद्भुवनैकनाथः पायाद्व्रजंतं प्र
मथाधिनाथः वेदांतवेद्योवतु मां निषसं मामव्य
यः पातु शिवः शयानं मार्गेषु मां रक्षतु नीलकंठः
शैलादिदुर्गेषु पुरत्रयारिः आरण्यवासादि महाप्र

याक्षेपायान्तरगव्यायउदारशक्तिः कल्पान्तकालोग्र
रुद्रकोपस्फुराट्टहासस्खलितांडकोशः घोरारिसे
नायुतदुर्निवारमहाभयाद्रक्षतुवीरभद्रः पञ्चास्य
मातंगघटावरूथिनांसहस्रलक्षायुतकोटिभी
षणं अक्षौहिणीनांशतमाततायिनांछिंद्यान्तरडो
घोरकुठारधारया निहंतुदस्यून्प्रलयानलार्चिर्ज्व
लत्त्रिशूलंत्रिपुरांतकस्य शार्दूलसिंहर्क्षमृगादि

शि॰
क॰
५

हिंस्रात्संत्रासयेद्धिप्रचनः पिनाकः दुःस्वप्नदुःशकुन
दुर्मददौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि
उत्पाततापविषभीतिमसद्ग्रहार्त्तीं व्याधींश्च नाशय
तु मे जगतामधीशः ॐ नमो भगवते सदाशिवाय
सकलतत्त्वात्मकाय सकलतत्त्वविभूताय सकल
लोकैककर्त्रे सकलोकैकहर्त्रे सकलनिगमगुह्या
य सकललोकैकवरप्रदाय सकलदुरितार्तिभंज

नाय सकलजगदभयंकराय शशांकशेखराय
श्मशाननिजावासाय निरामयाय निरातंकाय नि
ष्कलाय निरावासाय निराहाराय निष्प्रपंचाय नि
र्द्वंद्वाय निःसंगाय निर्गुणाय निरुपमविभवाय
निराधाराय नित्यशुद्धपरिपूर्णचिदानंदानंताह
यपरमशांत प्रकाशाय तेजोरूपाय जयजयम
हारुद्र भवावतार महाभैरव खट्वांग खड्गचर्म

शि·
क·
८
6

पाशांकुश डमरु त्रिशूल चापबाणासिगदाशक्तिभिं
डिपाल तोमर मुद्गर प्रास परिघ भुशुंडि शतघ्नि च
क्रायुध भीषणकर सहस्रमुख दंष्ट्राकराल विक
टाट्टहास विस्फारित ब्रह्मांडमंडल नागेंद्रमंडल
मृत्युंजय अनंतकांतक कामांतक त्रिपुरांतक वि
रूपाक्ष विश्वरूप विश्वेश्वर वृषभवाहन विश्वभू
षण भस्मभूषण विश्वतोमुख सर्वतोमुख सर्वतोर

ज्ज २ मांज्वल २ महामृत्युपमृत्युभयंनाशाय २ चौ
रान्नाशाय २ शत्रूनुच्चाटय २ त्रिशूलेनविदारय २
कुठारेणभिंद्धि २ खट्वांगेनविपोथय २ भूतानिवि
द्रावय २ कूष्मांडवेतालमारीगणब्रह्मराक्षस
गणान्संत्रासय २ ममाभयंकुरु २ वित्रस्तंमा
माश्वासय २ दुःखातुरंममानंदय २ क्षुधार्त्तिंनिवा
रय २ नरकभयान्मामुद्धारय २ शिवकवचेन

ग्रि·
क·
७

मामाछादय २ ॐसदाशिवायनमोनमस्ते ऋषभउ
वाच इतीदंकवचंशैवंपरमंव्याहृतंमया सर्वबा
याप्रशमंरहस्यंसर्वदेहिनां यःसदाधारयेन्मर्त्यः
शैवंकवचमुत्तमं नतस्यजायतेक्वापिभयंशंभोर
नुग्रहात् क्षीणायुःप्राप्तमृत्युर्वामहारोगहतोपि
वा देहांतेमुक्तिमाप्नोतिशिववर्मानुभावतः सद्यः
र्द्धमवाप्नोतिदीर्घमायुश्चविंदति सर्वदारिद्र्यप्र

८

मन्त्रंसर्वमंगल्यवर्धनं योधत्तेकवचंशैवंसदे
वैरपिपूज्यते महापातकसंघातैर्मुच्यतेचोपपा
तकैः देहान्तेमुक्तिमाप्नोतिशिववर्मानुभावतः
इतिश्रीशिवकवचस्तोत्रंसमाप्तम् ॥

श्रि॰
क॰
८

